## णिजां त्रयाणां गुणः श्लौ । (७५/२५०२)

निजादीनां त्रयाणां अभ्यासस्य गुणो भवति श्लौ सति । णिजिर् – नेनेक्ति । विजिर् – वेवेक्ति । विष्लृ – वेवेष्टि । त्रिग्रहणमुत्तरार्थम्, एषां हि वृत्करणं समाप्त्यर्थं पठ्यते एव इति । श्लौ इति किम् ? निनेज ॥

## भृञामित् । (७६/२४८६)

भृञादीनां त्रयाणामभ्यासस्य इकारादेशो भवति श्लौ सति । [1]भृञ् – बिभर्ति । [2]माङ – मिमीते । [3]ओहाङ – जिहीते । त्रयाणाम् इत्येव, [4]जहाति । श्लौ इत्येव, बभार ॥

## अर्तिपिपर्त्योश्च । (७७/२४९३)

[5]अर्ति पिपर्ति इत्येतयोः अभ्यासस्य इकारादेशो भवति श्लौ । इयर्ति [6]धूमम् । पिपर्ति सोमम् ॥

## बहुलं छन्दसि । (७८/३५९८)

छन्दसि विषये अभ्यासस्य श्लौ बहुलमिकारादेशो भवति । 'पूर्णां विवष्टि' (ऋ. ७.१६.११) । वशेरेतद् रूपम् । तथा वचेः – 'जनिमा विवक्ति' (ऋ.१.९७.७) । [7]सचेः – 'वत्सं न माता सिषक्ति' (ऋ. १. ३८.८) । [8]जिघर्ति सोमम् । न च भवति । [9]ददातीत्येवं ब्रूयात् । [10]'जजनदिन्द्रम्' (मै. १.९.१) । 'माता यद्वीरं दधनद्धनिष्ठा' (ऋ. १०.७३.१)[11] ॥

## सन्यतः । (७९/२३१७)

सनि परतोऽकारान्ताभ्यासस्य इकारादेशो भवति । पिपक्षति । यियक्षति । तिष्ठासति । [12]पिपासति । सनि इति किम् ? पपाच[13] । अतः इति किम् ? लुलूषति । [14]तपरकरणं किम् ? पापचिषते ॥

## ओः पुयण्ज्यपरे । (८०/२५७७)

[15]सनि इति वर्तते, इत् इति च । उवर्णान्ताभ्यासस्य पवर्गे यणि जकारे च अवर्णपरे परतः इकारादेशो भवति सनि प्रत्यये परतः । पवर्गे [16]अपरे – पिपविषते । पिपावयिषति । [17]बिभावयिषति । यण्यपरे – यियविषति । यियावयिषति । [18]रिरावयिषति । [19]लिलावयिषति ।

---

1. डुभृञ् धारणपोषणयोः इ. 2. माङ् माने इ. 3. ओहाङ् गतौ इ. 4. ओहाक् त्यागे इत्यधिकम इ. 5. इत् इति वर्तते इत्यधिकम् इ. 6. धूमम् नास्ति इ. 7. सचेः नास्ति क. 8. गॄ इत्येतस्यायं जिगर्ति क, जिघृ सेचने इ, गॄ घृ इत्येतयोः यङ्लुकि – जिगर्ति जिघर्ति इ. 9. वत्सं न ददाति क. 10. जजनदिन्द्रमाता इ, जजानम् इन्द्रम् ड, जजान गर्भं महिमानमिन्द्रः ह. 11. जुहोत्यादिषु एते त्रयोऽपि पठचन्ते इत्यधिकम् ई. 12. पिपासति नास्ति ड. 13. पपाठ इत्यधिकम् इ. 14–15. वाक्यमिदं नास्ति क.इ. 16. अवर्णपरे तावत् ई. 17. उदाहरणमिदं नास्ति क. 18. रिरविषति ब. 19. लिलविषति ब.